National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 195-196
© 2024 NJHSR
www.sanskritarticle.com

**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

**Correspondence:**
**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

# व्याकरणशास्त्रस्य भाषान्तरविषयः

**सिमरन रवीन्द्र ठाकुर**

**शोधपत्रसारः**

संस्कृतभाषां सुलभां सुमधुरां मन्यमानाः बहवोऽपि जनाः संस्कृतस्थविषयान् आदाय संस्कृतेनैव यदा भाषितुं पाठयितुं वा असमर्थाः तदा तद्ज्ञानाभावे नैराश्यकारणात् स्वविषयस्फुटतायै (इदानीन्तनकाले तु) तेषां प्राचुर्येणैव भाषान्तरकार्ये गतिस्सम्पन्नेति दरीदृश्यते। एवं भाषान्तरस्य कापेक्षापन्ना चेत्, पुराकाले अध्ययनपद्धतिः श्रवणमात्रं भवति स्म किन्तु अधुना तु लेखनम्, दर्शनम्, श्रवणम् इत्यादिभिः बहुभिः प्रकारैः सा छात्रेषु दृश्यते। अतः श्रवणमात्रेणैव न तावत् साध्यते अधुना। अतः तत्सहायकरूपेणैव प्रभूता लेखनशैली। लेखनं हि बहुभिः बह्वीः लिपीः आदाय क्रियते बह्वीषु च भाषासु च क्रियते। अतः नूनमेव सम्पत्स्यते तत्र क्वचित् स्वभावविचाराणां सत्ता। एवं तर्हि वास्तविकशब्दत्यागं कदाचित् क्वचित् अर्थत्यागमपि कुर्यात् भाषान्तरकर्ता। एवं हि सति बहुषु ग्रन्थेषु एवं रीतेः दुष्प्रभावाः दरीदृश्यन्ते।

न केवलं संस्कृतविषये अपि तु सर्वत्रैव भाषासु बहुधा अक्षरार्थे एव तात्पर्यं विज्ञाय शैल्यनुधावनं क्रियते। तेन तत्र तत्र विद्यमानानां पङ्क्तीनां शास्त्रकृदपेक्षितार्थस्वीकारो बहुधा त्यक्त इव भवति इति स्थितिः। किञ्च विपरीतकृतावपि तथैव। यथा – अन्यया भाषया यदि किञ्चित् भाषान्तररीत्या संसाध्यं तर्हि तत्र तावत् कष्टम् अनुभूयते। यतो हि प्राचुर्येण हि दृश्यते यद् भावार्थं विहायैव सर्वमपि कार्यं निरूह्यते। येन बहुत्र आनर्थक्यं भवति इति क्लेशः।

अतः नूनमेव दत्तावधाना भवेयुस्सर्वेपि भाषान्तरकर्तारः। तथैव अस्यां प्रक्रियायां संस्कृतांशस्य अन्यस्यां भाषायां भाषान्तरे कृते के क्लेशाः दोषा वा सम्भवन्ति इति इह चर्च्यते। यथैव हि दृश्यते अस्माभिः संस्कृतमित्युक्ते सति समेषाम् इदमेवैकं भवति यत् वेदार्थः सुतराम् अध्येतव्यः। अतः साक्षादेव वेदं पठितुं प्रयतन्ते। एवं हि यथेच्छम् अर्थानुधावनं स्यात्। तत्तर्हि महते क्लेशाय एव। तत्रापि विना शास्त्रज्ञानं कश्चिद् यदि कुर्यात् तद्भाषान्तरं तर्हि तु दोषभाक्त्वं तदंशस्य सुतरां सिद्धम्। अतः शास्त्राध्ययनं नितरामपेक्ष्यते। किन्तु शास्त्राणि तु सर्वाणि अपि संस्कृते एव सन्ति। अतः विना तद्ज्ञानं नैषाम् अध्ययनं शक्यम्। एतदर्थं तु अवश्यमेव भाषाध्ययनम् अपेक्षितं भवति। किन्तु भाषाम् अज्ञात्वैव तु एषाम् अध्ययनं यदि साध्यं तर्हि अवश्यमेव तत्र भाषान्तरस्य अपेक्षा भवति। इदमेव अनुवाद इति कथ्यते। यद्यपि उक्तस्य पुनः कथनम् अनुवादपदवाच्यं भवति अथापि रूढ्याधुना अस्मिन् अर्थे प्रयुज्यते।

किन्तु संस्कृतांशस्य अनुवादः यदा क्रियते तदा **अर्थत्यागो मा भूद्** इति स्मर्तव्यम्। किञ्च एतत्करणकाले भाषान्तरे वर्तमानानां शब्दानाम् अर्थानुसारं यथोचितं प्रयोगं कुर्यात् अनुवादकः। एवञ्च मूलस्य अर्थभङ्गः अर्थान्तरापत्तिर्वा न भवेद् इति स्मर्तव्यम्। इह तावत् प्राधान्येन व्याकरणविषयमादाय केचन अंशाः स्पृश्यन्ते। तत्र अनुवादे वस्तुतः अपेक्षिता अंशाः तथैव तत्र अनुभूयमानाः क्लेशाः इह प्रस्तूयन्ते।

**शोधपद्धतिः**

समीक्षणात्मकम् अध्ययनपद्धतिमादाय शोधपत्रमिदं प्रस्तूयते।

**सङ्केतशब्दाः**

अनुवादः, व्याकरणम्, शैली, शास्त्रम्।

**विषयः**

संस्कृते वर्तमानानां शास्त्राणां यथोचितम् अनुवादं कर्तुं प्रयतन्ते जनाः। किं तु एवं कार्ये बहुधा अनवधानवशादेव अर्थतात्पर्यम् अविचिन्त्यैव अक्षरशः अनुवादस्य प्राधान्यं सम्पाद्यते। एवं कृते शास्त्रस्य वास्तविकं प्रयोजनं यत्तन्नष्टं भविष्यति। अतः तदर्थम् अनुवादकर्तुः तच्छास्त्रज्ञानं नूनमेव अपेक्षितं भवति। ज्ञानोत्तरमपि अनुवादे प्रस्तुतिशैली कथं भवेद् इत्यत्र अवश्यमेव सावधानता अपेक्षिता। अन्यथा शास्त्रपङ्क्तीनां वास्तविकार्थकथनं नैव स्यात्। तथैव संस्कृतेपि यदा अन्यस्याः भाषायाः अनुवादः क्रियते तदा क्वचित् तत्तद्भाषाप्रभावो दरीदृश्यते। तथैव लौकिकवाक्यानामपि अनुवादे केचन दोषाः भाषान्तरप्रभावेण आचर्यन्ते। व्याकरणे अपि बहुधा प्रसङ्गम् अज्ञात्वैव केचन दोषाः भवन्ति।

इह केचन व्याकरणानुवाददोषाः सङ्कलिता –

- भाषादोषाः – संस्कृते वर्तमानानां पदानाम् अक्षरानुवादः न कार्यः। शास्त्रे विद्यमानस्य विषयस्य सङ्ग्रहः यथा स्यात् तथा अनुवादशैली अपेक्ष्यते।
- भावदोषाः – यद्यपि अक्षरानुवादः न कार्यः अथापि पदार्थस्तु न हेयः। तन्नाम अपेक्षानुगुणम् उभयथा इदं साध्यम्।
- व्याख्यानाभावः – व्याकरणे बहुत्र सूत्रस्य वृत्तिषु इदं दृश्यते यत् सूत्रार्थः ग्रन्थकृता नोल्लिखितः भवति। तद्यथा – **झलां जश् झशि**[1] इत्यत्र वृत्तिः साक्षान्नोक्ता अपि तु तत्र केवलं स्पष्टम् इत्येव लिखितम्। अतः अनुवादकस्य इदं कार्यं यत् पठितुः अर्थप्रतिपत्तिर्यथा स्यात् तथा लिखेत्।

**अनुवादे व्याकरणस्य का अपेक्षा?**

- व्याख्यानस्य महत्त्वं वर्णयन् महर्षिः पतञ्जलिरप्याह - **न केवलं चर्चापदानि व्याख्यानम् - 'वृद्धिः, आत्, ऐच्' इति। किं तर्हि? उदाहरणम् - प्रत्युदाहरणम् - वाक्याध्याहारः - इत्येतत्समुदितं व्याख्यानं भवति॥**[2]
- इत्थमेव **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्**[3] इत्यत्र ऊहविषये उच्यते यत् - **न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथाऽर्थं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथाऽर्थं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्॥**[4] इति। अतः न केवलमिदं वाक्यं वेदविषयकमेव अपि तु सर्वस्यैव अर्थग्राही भवति।

**व्याकरणशास्त्रसम्बन्धिविषयेष्वनुवादस्य न्यूनता –**

- व्याकरणे काश्चन शास्त्रीयाः पङ्क्तयः एवं भवन्ति यासाम् अनुवादः अवगमनरीत्या न शक्यः। यथा – एककालावच्छेदेन प्रयुक्तानां वर्णानाम् इत्यस्यां पङ्क्तौ केवलस्य अक्षरार्थस्य विचारणा न शक्या। अपि तु अत्र भावप्राधान्येन सव्याख्यानम् अनुवादापेक्षा विद्यते। किन्तु अनुवादे बहुधा इयं शास्त्रीयापङ्क्तिः इत्यतः न तत्र अनुवादाय कश्चित् यतते।
- एवं रूपेण अनूदितानां पुस्तकानां शैल्या एव सारल्यम् अनुभूय मूलग्रन्थाद् भाषायाश्च विमुखाः भवन्तः जनाः कदाचिद् मूलमेव जहति इत्यपि बहुधा अवलोक्यते।

**फलम्**

अवश्यमेव अनुवादकर्त्रा इह सम्प्रधार्यं यत् अनुवादकरणेन क्वापि सिद्धान्तभङ्गो मा भूत्। तथैव इह सर्वत्र भावार्थः, अक्षरार्थः व्याख्यानं च सः सङ्कलयेत्। संस्कृतानुवादकारणेन मूलभाषायाः रुच्यभावः यथा न स्यात् तथा कार्यं सम्पाद्य पुनः मूलविषये भाषायां च पठितुः प्रवृत्तिः भवेद् इति स्मर्तव्यम्।

**संदर्भ ग्रंथः**

[1] पाणिनिसूत्रम् – ८.४.५३

[2] व्याकरणमहाभाष्यम् – पस्पशाह्निकम्

[3] व्याकरणमहाभाष्यम् – पस्पशाह्निकम्

[4] व्याकरणमहाभाष्यम् – पस्पशाह्निकम्